चेत् अविभावे । व्यवान्यात् उच्छ्वसेद्यदि । प्रथमाया आवृतः वसोर्मन्दाया अन्ते ॥ ९ ॥

मध्ये वा ॥ १० ॥

उच्छ्वसेत् । ओंपावमाना इत्यस्याः ॥ १० ॥

प्राग्वा हिंकारात् ॥ ११ ॥

अथवा अवनर्दस्योपरिष्टात् प्राग्धिंकारात् व्यवान्यात् । उच्छ्वसेद् इत्यर्थः । इया ३३३३३ इत्यत्र ॥११॥

यत्र वा ताम्येत ॥ १२ ॥

अथवा यत्र वा ताम्येत श्रान्तो भवति तत्रोच्छ्वसेत् ॥१२॥

अव्यवानंस्त्वेवैतज्जिगासेत् ॥ १३ ॥

तुशब्देवशब्दावधारणे । अव्यवानँस्त्वेव अनुच्छ्वसँस्तेव । एतत्

---

2. AB³I °छन्दसो for °छन्दसोः
3. AI व्याह्रत्यर्थं for व्याप्त्यर्थं
4. AIB³ after भवति ins. इति ; AB³ निरुक्तं for निरुक्तां चानिरुक्तां
7. A om, तथा

गायत्रं साम जिगासेत् । गातुमिच्छेत् । किमुक्तं भवति । यावच्छक्त्या अनुच्छ्वसन्नेवैतत् गायत्रं गायेदित्यर्थः ॥१३॥

ऊर्ध्वं प्रस्तावात् त्र्यावृद्गेयम् ॥ १४ ॥

इमे वै लोका गायत्रं त्र्यावृद् गेयम् (तां० ब्रा० ७.१.१) इत्यविशिष्टायां श्रुतौ न विज्ञायते कुतःप्रभृति त्र्यावृद्गेयमिति । अत उच्यते—ऊर्ध्वं प्रस्तावात् । त्र्यावृद् गेयम् इति । त्र्यावृदिति पर्वण इयं संज्ञा ॥१४॥

कार्या वसोर्मन्दा प्रस्तावमात्रमितिशिष्य ॥ १५ ॥

तच्च त्र्यावृति गायत्रे । प्रथमा या आवृत् सा कार्या करणीया । वसोर्मन्दा-पर्व तंवोदस्मम् (ग्रा० गे० ६.१.२३६.३) इति तृतीये साम्नि स्वरतो विधीयते । परस्तात् द्वे आवृतौ । पा३वमानायेन्दावाऽइ । इत्येका । अभिदेवाँ३ इयाऽ३१ [इत्यपरा] । अत्रोच्यते । वसोर्मन्देति वाच्यम् । लघुत्वात् । कार्या-ग्रहणं न कर्तव्यम् । उच्यते । लक्षणोक्तस्य विधेरधिकारार्थम् । सामलक्षण् अस्या वसोर्मन्दाया अनेकधा विकारो विधीयते । तदर्थं कार्याग्रहणम् । सेह वसोर्मन्दा विकृता द्रष्टव्या । प्रस्तावमात्रमतिशिष्येति प्रस्तावमात्रम् ऋचोऽतिशेषयित्वा (!) । पदं वा अष्टाक्षरं वा ॥१५॥

द्वितीया चावृद्वृणीमहाद्व्यक्षरम् ॥ १६ ॥

17 यत्र त्र्यावृति गायत्रे प्राथमाया आवृतः वसोर्मन्दायाः परस्तात्

---

1. V. om. गातुम्···गायत्रं (L. 2) ;
2. IAB^3 जिगासेत् for गायेत्
4. AIB^3 अव° for अवि°
5. VI ज्ञायते for विज्ञाते
8. A त्र्यावृदिति for त्र्यावृति ; AB^{3}I om. सा
10. V. आवृत्तौ for आवृतौ ;
11. V. om. अभिदेवाँ३ इयाऽ३२ AIB^3 कार्यम् for वाच्यम् ;
12. IA वक्तव्यम् for कर्तव्यम् V विधिः for विधेः ; AB^3 °कारसिद्धयर्थम् for कारार्थम्
13. IAB^3 विकारे विधीयमाने for विकारो विधीयते;
14. IAB^3 अधिका for विकृता
15. V after अष्टाक्षरं om. वा
17. B^3 आवृति for त्र्यावृति

द्वितीया आवृद् वृणीमहा स्वरतो विधीयते। ऋच उत्तमे पादे द्वयक्षरम् अतिशेषयित्वा। अभिदेवाꣳइयाऽ३। इति। अत्रोच्यते। वृणीमहा द्वयक्षरमिति वाच्यम्। लघुत्वात्। सख्यावृतोर्ग्रहणमनर्थकम्। कस्मात्। पूर्वाधिकारात्। पूर्वस्मिन् विधौ प्रथमाया आवृत उपदेशात्। अनन्तरा द्वितीया भविष्यत्येवावृत्। आवृतश्चाधिकारो वर्तते। उच्यते। संख्यावृतोर्ग्रहणं प्रथमाया आवृतो विकल्पार्थम्। प्रथमायामावृति वसोर्मन्दायां विकल्पेन मध्ये वा विच्छेदो दृष्टः। विच्छेदोपेतेऽस्मिन् पर्वणि द्वितीयेवेत्थमावृद्भवति। न तृतीया ॥१६॥

तस्यास्त्वन्तो द्वितीयम् ॥ १७ ॥

तस्या वृणीमहाया अन्तो द्वितीयस्वरमापद्यते। अत्रोच्यते। अन्तो द्वितीयमिति वाच्यम्। लघुत्वात्। तस्यास्त्विति न वक्तव्यम्। कस्मात्। अधिकारात्। तस्या अधिकारो वर्तते एव। उच्यते। तस्यास्त्विति कृत्स्नपदप्रसिद्धये। तस्या द्वयक्षरावशिष्टायाश्च कृत्स्नपदायाश्च ऊर्ध्वं चार्चिकाद्धिकारात् परमिति कृत्स्ने पदे न वृणीमहा भविष्यति। तदर्थं तस्या ग्रहणम् ॥१७॥

अवृद्धो वानवनर्दं चेत् ॥ १८ ॥

अवृद्धो वा वृण्या अन्तः स्यात्। अनवनर्दं यदि गायत्रं साम गीयते। अभिदेवाꣳ इयाऽ३ इति ॥१८॥

प्रत्युत्क्रान्तस्त्ववनर्दवति ॥ १९ ॥

अवनर्दवतीति द्विरवनर्देद्विकुर्यात् (तां० ब्रा० ७.१.२) इति। न ज्ञायते

---

1. IAB^3 om. आवृद् ; A स्वरो° for स्वरतो°
6. V आवृतिर् for आवृति
7. विच्छेदेऽप्येतस्मिन् for विच्छेदोपेतेऽस्मिन्
10. V तत्र for अत्र
13. V द्वयक्षरायावशिष्टायाः, V द्वयक्षरायावसिष्टायाः AB^3 द्वयक्षरावसिष्ठायाः for द्वयक्षरावशिष्टायाः
19,20. IAB^3 °नर्दति for नर्दवति

किमुक्तं भवतीति। अत उच्यते अवनर्दवति गायत्रे वृण्या अन्तः प्रत्युत्क्रान्तो भवति [इति] ॥१९॥

किंस्वरूपोऽवनर्दो भवतीत्यत आह—

प्रत्युत्क्रम्य कृष्टमवनर्दः ॥२०॥

प्रत्युत्क्रम्य कृष्टमवनर्दो भवति। अभिदेवाꣳ इयाऽ१२ इति ॥२०॥

स द्विः ॥२१॥

सः अवनर्दो वृण्या अन्ते द्विः भवति। अभिदेवाꣳ इयाऽ१२१२। इति ॥२७॥

सकृत् ॥२२॥

सकृत् वा। अभिदेवाꣳ इयाऽ१२। इति ॥२२॥

न वा ॥२३॥

वृण्या अन्ते न वा अवनर्दो भवति ॥२३॥

हुम्मा सार्वास्वरा प्रतिहारः ॥२४॥

परमुद्गाते-(गा० वि० सू० १. ८)त्युद्गातुर्भक्तेर्भक्तयन्तरोपदेशः। हुम्मा। सार्वास्वरा। प्रतिहारः। इत्येतानि पदानि। अर्थो वाच्यः। हुम्मेति द्रव्योपदेशः। हुम्माद्रव्यम् उपदिश्यते। सार्वास्वरा इति पर्वग्रहणेन स्वर उपदिश्यते। प्रतिहार इति भक्त्युपदेशः। अत्रोच्यते। हुम्माग्रहणानर्थक्यम्। कस्मात्। हिंकारो हि गायत्रस्य (तां० ब्रा० ७.१.४) इति श्रुतिसिद्धत्वात्। तथा सार्वास्वरा इति स्वरग्रहणवैयर्थ्यम्। कस्मात्। पर्वोपदेशात्। सार्वापर्व व्यपदिश्यमानं स्वरमेव गृह्णाति। तथा प्रतिहार इति न वाच्यम्। कस्मात्। पाञ्चविध्योपदेशात्। सर्वथा गायत्रस्य साम्नः पाञ्चविध्यमुप-

---

3. V भविष्यति for भवति
6. V reads sutras 21-23 as a single one and inteprets accordingly
12. AB³ रन्तो for अन्ते
13. A हिम्मा for हुम्मा in all places
16. A om. °पदेशः। हुम्माद्रव्यम् उ°; AIB³ स्वरम् for स्वरः

दिश्यते। तत्र पाश्चविध्यविधौ परस्तादुद्गातृभक्तेः प्रतिहर्तृभक्तिर्भवत्येव। किमत्र वक्तव्यम्। उच्यते। हुम्माग्रहणं सार्वास्वरे नियमार्थम्। ब्राह्मणे तु नोक्तः स्वर इति हुम्माया विधानम्। तथा स्वरग्रहणं रथन्तरवर्णायामेकाक्षरप्रज्ञापनार्थम्। रथन्तरवर्णायामेकाक्षरेऽपि हिंकारे तमेव सार्वास्वरं प्रज्ञापयति। तथा प्रतिहारग्रहणम् अधिकारार्थम्। अधिकृत्य विधयः प्रवर्तन्ते। अथवा विकल्पार्थम्। प्रकृत्यनन्तरं वैकारिका विकल्पा भविष्यन्ति। तत्रैव विकारो वक्तव्य इति। अतः प्रकृतिमुपादायाहाचार्यः ॥२४॥

हुंआ हुंबा हुंभा वा ॥२५॥

अथवा हुं३आ३ हुं३बा३ हुं३भा३। एवं वा हिंकारः ॥२५॥

उद्गात्रोच्यमानो मनसा ध्येयः ॥२६॥

हिंकारः उद्गात्रा उच्यमानः प्रतिहर्त्रा मनसा ध्येयः। अस्य सूत्रस्यानारम्भः। कस्मात्। ब्राह्मणोक्तत्वात्। हिंकारो वै गायत्रस्य प्रतिहारः। स मनसा ध्येयः (तां० ब्रा० ७.१.४-५) इति। उच्यते। उद्गातुः प्रज्ञापनार्थम्। ब्राह्मणे उद्गात्रोच्यमान इति नोक्तम्। तमिह प्रज्ञापयति ॥२६॥

वृद्धान्त्यावृत्तद्विविढा ॥२७॥

ऊर्ध्वं प्रस्तावात् त्र्यावृद्गेयम् (गा० वि० सू० १.१४) इति कार्या वसोर्मंदा (गा० वि० सू० १.१५) इति द्वितीया चावृद् वृणीमहा द्व्यक्षरम् (गा० वि० सू० १.१६) इति आवृद्द्वयमुक्तम्। अथ तृतीयाया आवृत उपदेशः। वृद्धा। अन्त्या। आवृत्। तद्विविढा। इत्येतानि पदानि। अत्रार्थो वाच्यः। वृद्धेति मात्राग्रहणम्। अन्त्येति संख्यानियमः। आवृदिति पर्वसंज्ञा। तद्विविढेति पर्वग्रहणम्। क्षातो। अत्रोच्यते। वृद्धग्रहणं न कर्तव्यम्।

---

1. BB^{3}I °हर्तुर् for °हर्तृ°
2. B^4 before उच्यते ins. अत्र ; A हिम्मा° for हुम्मा in all places ; AB^3 सार्वास्वरा, I सर्वास्वरा, I सर्वास्वरे for सार्वास्वरे
5. AB^3 om. अधिकृत्य···विकल्पार्थम्
7. A after आचार्यः। adds: सार्वास्वरा यद्यगच्च इति शाकलो निगद्यते।
8,9. AB^3 हिंआ हिंबा हिंभा for हुंआ हुंबा हुंभा
9. V om. अथवा
17. V after °महा ins. वृद्ध°

कस्मात् । तद्विविढ्ढोपदेशात् । तद्विविढ्ढायाश्च वृद्धिर्विद्यत एव । तथा अन्त्यग्रहणवैय्यर्थ्यम् । कस्मात् । अन्त्योपदेशादेव । यस्मादन्ते उपदेशोऽस्याः । तथा आवृद्ग्रहणानर्थक्यम् । कुतः । श्रुतिसामर्थ्यात् । श्रुतौ आवृत्त्रयं विधीयत एव । अनुक्तेऽप्यावृदेवैषा भविष्यति । इयं च तृतीया । तथा तद्विविढ्ढाग्रहणवैयर्थ्यम् । कुतः । अनादेशे आद्यस्वरप्राप्तेः । स्वरस्य चानादेशे आद्यो हि स्वरः । प्रसिद्धमेवैतत् । किमत्र वक्तव्यम् । उच्यते । वृद्धग्रहणं कृत्स्नप्रज्ञापनार्थम् । कृत्स्नाया आवृतो वृद्धिं प्रज्ञापयति । तद्विविढ्ढा तु अन्त्यवृद्धा । तदर्थं वृद्धाग्रहणम् । तथा अन्त्यग्रहणमनवनर्देऽप्यन्त्यार्थः प्रसज्येत । तथा आवृद्ग्रहणं हिंकारप्रसङ्गात् हिंकारेऽपि आवृत्संज्ञा प्रसज्येत । तथा तद्विविढ्ढाग्रहणमधिकारार्थम् । अधिकृत्य विधयः प्रवर्तन्ते ॥२७॥

आकारश्च तत्स्वरः ॥२८॥

च-शब्दः समुच्चये । इदं चेदं चेति । तस्या आवृतः परस्तादाकारश्च तत्स्वरः । तद्विविढ्ढास्वरो भवतीत्यर्थः । अत्रोच्यते । आकारश्चेति वाच्यम् । लघुत्वात् । तत्स्वराधिकारात् । तद्विविढ्ढास्वरः प्रकृत एवेति । उच्यते । तत्स्वरग्रहणं काम्यनियमार्थम् । अक्षरयोस्त्वेवोपरिष्टादभ्यादध्याद् (गा० वि० सू० १.३४) इति । काम्यमपि यत्किंचिन्निधनं तत्स्वरं भवतीत्यर्थः ॥२८॥

स्वरितो वा द्वितीयात् ॥२९॥

१११
आकारः स्वरितो वा द्वितीयात् स्वराद् भवति । आऽऽ३४२ ॥२९॥

2. AB³I. ग्रहणं व्यर्थम् for °ग्रहणवैयर्थ्यम् ; VI om. कस्मात्
3. AB³ om. कुतः
5. IA om. कुतः ; A नादेशः, IB³ अनादेशः, V अनादेशो for अनादेशे
7. AI वृद्धि° for वृद्ध°
8. IAB³ तद्विवृद्धा for अन्त्यवृद्धा ; IAB³ om. तथा अन्त्यग्रहणं
9. IBA³ अन्त्योऽर्थः for अन्त्यार्थः
10. VI om. अपि
13. V आकारः for आवृतः
14. IAB³ after इति add न ;
15. V °कारा for °कारात्

वाग्वा आकारस्थाने ॥३०॥

[आकारस्थाने] वाक्-शब्दो वा निधनं भवति ॥३०॥

अनुज्ञानं वा ॥३१॥

आकारस्थाने अनुज्ञानं वा। अनुज्ञामोंकार इत्यर्थः। अनुकारो वा निधने भवति ॥३१॥

निधनानि च पञ्च ब्राह्मणे काम्यानि। एकैकमक्षरयोः स्थाने कार्यम् ॥३२॥

निधनानि चेति। यान्येतानि आकारादीनि अक्षराणि पुरस्तादुक्तानि एतानि निधनानि भवन्ति। ब्राह्मण इति श्रुतिध्ययेदेशः। काम्यानीत्यवधारणे। तेषामिति निर्देशः। एकैकमिति पृथङ्निधनक्रियानिर्देशः। अक्षरयोरिति निर्देशोऽन्त्यार्थम्। ऋगन्तयोरक्षरयोरित्यर्थः। स्थाने कार्यम् इति विध्युपदेशः। आऽऽ२३४५। वाऽऽ२३४५क्। ओऽऽ२३४५म्। इत्येतानि निधनानि। ब्राह्मणोक्तानि पुनः काम्यानि। यथा इडाऽऽ२३४५॥ सुवाऽऽ२३४५ः॥ यशाऽऽ२३४५ः॥ आयूऽऽ२३४५ः॥ हाꣳसी२३४५॥ एवं निधनानि भवन्ति। अत्रोच्यते। निधनानि च पञ्च ब्राह्मणे काम्यानीति कृत्स्नस्यैव सूत्रस्यानारम्भः। कुतः। विधेः सिद्धत्वात्। सर्वमिदं विधानं सिद्धम्। ब्राह्मणे निधनान्येवैतानि पञ्च काम्यानि चैवेति। उच्यते। धुरोगानप्रसङ्गार्थम्। धुरोगाने यानि निधनानि प्रसिद्धानि तान्यप्यक्षरयोः स्थाने प्रसज्येरन् ॥३२॥

---

1. AB³ combine sutras 30 and 31
4. AB³ om. आकारस्थाने···भवति (L. 5)
6. VA om. च
10. V. om. एकैकम्···ऋगन्तयोर्
11. IB³A trans. निर्देशोऽन्त्यार्थम् in place of अर्थः
16. IAB³ पृथग्वै for कृत्स्नस्यैव
17. B³ before ब्राह्मणे adds ः इत्येतानि ; B³ after निधनानि om. एव
18. AIB³ प्रसर्पणार्थम् for प्रसङ्गार्थम् ; धुरा° for धुरो ; B³ om. अपि
19. B³ प्रसज्येत्, I संप्रसज्येत् for प्रसज्येरन्

ऊर्ध्वं वार्च्चिकार्च्छिकारात्परम् ॥३३॥

वेति विभाषा। ऊर्ध्वमार्च्चिकात् कृत्स्नाया ऋचो हिंकारात् परं काम्यानि निधनानि स्युः। अभिदेवाᳬ इयक्षताऽ३३३३३। हुम्बा३३। इडा३१११। एवं सर्वाणि ॥३३॥

अक्षरयोस्त्वेवोपरिष्टादत्यादध्यात् ॥३४॥

तु-शब्दैवशब्दाववधारणे। अक्षरयोस्तु ऋगन्त्ययोरुपरिष्टात् अतीत्य आदध्यात्। क्षा३तो३। इडा३१११। एवं सर्वाणि ॥३४॥

स्तुत्वा वा संकल्पयेत मनसादोनिधनं मे गायत्रमिति ॥३५॥

इति शुङ्गकृते गायत्रविधाने प्रथमा कण्डिका ॥१॥

अथवा स्तुत्वा मनसा अदोनिधनं मे गायत्रमिति। सार्वसामिकं विधानमुक्तम्। यदेतत् काम्येषु निधनेषु विधीयते तदेवं संकल्पयेत। मनसा इडानिधनमेतद् गायत्रं तद्गतमिति। एवं सर्वाणि ॥३५॥

इति गायत्रविधानभाष्ये प्रथमा कण्डिका ॥१॥

---

1. IVB[3] च for वा
2. IVB[3] om इति
3. AB[3] हिंबा for हुंबा
11. IB[3]A सार्वादिकं for सार्वसामिकं ;
12. AB[3] तद् for यद् ; V om. एतद् ; V यद् for तद्

द्वितीया कण्डिका

वर्णवृत्तम्

बहिष्पवमानाद्या रेतस्याहिंकृता सप्रतिहारा ॥१॥

बहिष्पवमानस्य आद्या रेतस्या नाम स्तोत्रीया। सा अहिंकृता सप्रतिहारा भवति। अत्रोच्यते। संज्ञाग्रहणवैय्यर्थ्यम्। कुतः। श्रुतिसूत्रयोरुक्तत्वात्। तयोरपि रेतस्याविधानमुक्तम्। उच्यते। रेतस्याग्रहणमेकत्रिकार्थम्। एकत्रिके असावेका स्तोत्रीया रेतस्या भवति। रथन्तरवर्णा उत्तमस्थानीया तथा। अहिंकृता सप्रतिहारेति। न ज्ञायते कथमहिंकृता सप्रतिहारा भवतीति। उच्यते। उद्गातुरत्र प्रतिषेधः। अहिंकृतेति प्रतिहर्तुर्मनसा ध्यानं विधीयते। सप्रतिहारेति अहिंकृता सप्रतिहारा भवत्येव ॥१॥

उत्तमा त्वविसृष्टहिंकारा रथन्तरवर्णा ॥२॥

तु-शब्दो विशेषणार्थः। बहिष्पवमानस्य उत्तमा स्तोत्रीया रथन्तरवर्णा अविसृष्टहिंकारा भवति। हिंकारस्य विसर्गो न भवतीत्यर्थः। आकारस्य विसर्गः। हुम् ३ इति ॥१॥

तस्या ऊर्ध्वं प्रस्तावाच्चत्वार्यक्षराण्यभिष्टोभेद् रथन्तरवत् त्रीणि वाष्टौ वा ॥३॥

तस्याः रथन्तरवर्णायाः प्रस्तावात् ऊर्ध्वं चत्वार्यक्षराणि अभिष्टोभेत्। चतुर्णामक्षराणां स्थाने स्तोभान् कुर्यादित्यर्थः। कान् स्तोभान् इत्याह—

---

4. IAB[3] °माने for °मानस्य
5. A om. कुतः···°त्रिकार्थम् (L. 6)
9. VB[3] अयं for अत्र
11. VB[3] °सृष्टा for °सृष्ट°; om. रथन्तरवर्णा
13. V हिंकार° for हिंकारस्य; V आकारो for आकारस्य,
14. AB[2]हिम् for हुम्

रथन्तरवत् । यथा भाभा इति शाण्डिल्यो भभ इति धानंजय्यः । इत्येवम् । त्रीणि वा अभिष्टोमेत् । प्रथमाक्षरस्य लोपः । अष्टौ वा इति विकल्पः ॥३॥

द्वादश वा अनुष्टुभ्येके ॥४॥

अनुष्टुभि छन्दसि द्वादश वा अभिष्टोमेत् । चत्वारि वा त्रीणि वा अष्टौ वा ॥४॥

ऊने पादे नाᳬशब्दमभ्यस्येदापूरणात् ॥५॥

छन्दःसु ऊने पादे नाᳬशब्दमभ्यस्येदापूरणात् पादस्य । उदाहरणान्युत्तरत्र भविष्यन्ति । अत्रोच्यते । शब्दग्रहणानर्थक्यम् । नामभ्यस्येदिति वाच्यम् । लघुत्वात् । उच्यते । शब्दग्रहणमुभयार्थम् । यदि मूर्धन्यो यदि दन्त्यः । सर्वेभ्यो नांशब्दमभ्यस्येत् ॥५॥

अनभ्यासं त्वाचार्याः ॥६॥

इति पक्षान्तरम् ॥६॥

प्रयोजनानि गायत्रविधानार्थानि ॥७॥

पद्यो गायत्रस्ये-(गा० वि० १. १)ति प्राकृतगायत्रस्य साम्नः पाञ्चविध्यविधानमुक्तम् । अथ वैकारिकाणि भावाश्रितानि प्रयोजनानि च

---

1. AB^{3}I om. शाण्डिल्य:
2. A om. इति
6. B^3 णाᳬ for नाᳬ
9. B 1-8 leaves are missing and begins with वाच्यम् ; V om. उच्यते
11. B^1 आचार्य: for आचार्या:
14. B^1 प्रकृतस्य for प्राकृत° ; V om. °गायत्रस्य
15. I °विध्ये for °विध्य°; AIB^1 विधानार्थम् for विधानम् ; B^{1}AIB^3 वकारिक° for वैकारिकाणि ; IA om. च

वक्तव्यानीति। तस्मादाह—प्रयोजनानि गायत्रविधानार्थानीति। अत्रार्थो वाच्यः। वैकारिकाणि भावाश्रितानि प्रयोजनानि गायत्रस्य साम्नः विधानार्थानि। अत्र ब्रूमः। कृत्स्नस्यैव सूत्रस्यानारम्भः। कुतः। गायत्रविधानोपदेशात्। सर्वथा गायत्रस्य साम्नो विधानोपदेशः(-शे?) वैकारिकाणि भावाश्रितानि प्रयोजनानि गायत्रस्य साम्नो विधानार्थान्येव भविष्यन्ति। किमत्र वक्तव्यम्। उच्यते। सूत्रारम्भो बहिष्पवमाननिवृत्त्यर्थः। वैकारिकाणि भावाश्रितानि प्रयोजनानि गायत्रस्य साम्नः विधानार्थानि भवन्ति। न बहिष्पवमानार्थानि भवन्तीत्यर्थः ॥७॥

उपह्वरे कस्त्वा सत्योऽभीषुणः सगमे द्युम्नानि पर्षिराधोयुक्तावह्निः ॥८॥

यदुक्तम्—ऊने पादे नाप्यशब्दमभ्यस्येदापूरणात् (गा० वि० २. २) इति तस्य विधेरेतान्युदाहरणानि। उपह्वरेगिरीणां नोऽ३म् (सा० १४३)। कास्त्वा-सत्योमदानां नोऽ३म् (सा० ३८३) अभीषुणः सखीनां नोऽ३म् (सा० ६८४)। एतानि प्रास्ताविके उदाहरणानि। ओंसंगमे च नदीनां नाऽ३म् (सा० १४३)। ओं द्युम्नानिमानुषाणांनाऽ३म् (सा० ६७४) एते उद्गीथे वसोर्मन्दाया उदाहरणे। पार्षिराधोमघोऽ३३३३ हम्आ३३। ना३नो३३ (सा० ६९१)। युक्तावह्नी-रथा३३३३३हुं३ आ३३ना३नो३३ (सा० १४९)। तृतीये पादे उद्गीथप्रतिहार-विषये एते उदाहरणे ॥८॥

---

3. V गायत्रस्य for गायत्र°
4. V om. सर्वथा···देशः
5. V गायत्र° for गायत्रस्य साम्नो
6. A निवृत्यर्थम् for निवृत्त्यर्थः
7. AI om. न ; IAB^3 °मानार्थान् प्रभवन्ति for °मानार्थानि भवन्ति
12. B^{1}B^{3}IA गिरीणांणों३ for गिरीणांनोंऽ३
13. B^1 om. अभीषुणः सखीनानोंऽ३
14. V प्रास्ताविकानि for प्रास्ताविके
15. V मन्दायाम् for मन्दायाः
16. A हिस्थि आऽ२, B^3 हुंस्थिआऽ२ for हुम् आ३३

यवान्ते संयोगे यवाभ्यां प्रागिकारोकारौ ॥९॥

पादपूरणमधिकृतमेव । यकारवकाराभ्यां प्रागिकारोकारौ कर्तव्यौ । यकारवकारान्ते संयोगे ऊने पादे पादपूरणार्थम् । यकारान्ते संयोगे इकार आपाद्यः । वकारान्ते उकारः । एवंलक्षणान्युदाहरणानि वक्ष्यामः ॥९॥

उस्थानि प्रकृतिभूतानि ॥१०॥

उकारस्थानि व्यञ्जनानि प्रकृतिवद् भवन्ति । न तत्र विकारो भवतीत्यर्थः । उस्थानीति । अत्रोच्यते । उस्थानि प्रकृतिवदिति वाच्यम् । लघुत्वात् । भूतग्रहणानर्थक्यम् । कुतः । उपदेशात् । उपदेशो हि भाव उच्यते । उच्यते भूतग्रहणं प्राप्तप्रतिषेधार्थम् । उत्तरत्र उस्थस्य ओकारस्येति वचनात् ओभावप्राप्तिर्भवति । उभयत्र प्राप्ते प्रतिषेधार्थं भूतग्रहणम् ॥१०॥

अत्रोदाहरणानि—

आरे बाधस्व मन्युं जनस्य ॥११॥

आरेबाधस्वदू ३३३३३हुं३आ३३ (सा० ६२७) । मन्युं जनस्यदू३३३३३हुं ३आ३३ (सा० ११३) । एते उदाहरणे ॥११॥

वस्वीरनुस्वर स्वाध्यः स्वर्विद इति ॥१२॥

यदुक्तम्—यवान्ते संयोगे यवाभ्यां प्रागिकारोकारौ (गा० वि० २.९) इति तस्य विधेरेते उदाहरणे । वस्वीरनुस्वारा ३३३३३हुं३आ३३३ । जी३योषा३-

---

2. A पादौ for पाद° ; I ग्रहणम् for पूरणम्
4. VA आपद्यः for आपाद्यः
7. AIB[3] एव for अत्र
9. AI om. first उच्यते ; AIB[1] उत्तर, V उतरत्रत्वात् for उत्तरत्र ; V उकारस्य for ओकारस्य
10. V उभावाप्राप्तिर्भविष्यति for ओभावप्राप्तिर्भवति ; AB[1]IB[4] प्राप्तेः for प्राप्ते
13. हिंस्थि for हुम्
17. AB[3]I om. जी३योषा३आ३१११

आ३१११ (सा० ४०६)। जीतिभावप्राप्तिरियम्। उत्तरत्र भविष्यति जा३यो३। सुवाधियः सुवा३३३३३हुं३आ३३। वा३दो (सा० ५४८) ॥१२॥

न पदादौ प्राग्भावो हन्यद्दस्युं दधद्योधा ॥१३॥

यदुक्तम्—यवान्ते संयोगे यवाभ्यां प्रागिकारोकारौ (गा० वि० २. ९) इति तस्यायं प्रतिषेधः। न पदादौ यकारवकारयोः स्थितयोः प्राग्भावो भवति। इकारोकारौ न भवत इत्यर्थः। यथा ओम्३हन्यद्दस्युन्नयं विवेरप उभे यत्त्वा रोदसी धावतामा३नू३३ (सा० ३७१)। ओम्३नार्षद्यासीददपाम्। विवर्ते दधद्योधायीसुते-वयाꣳसी३३ (सा० ७७) इत्येते उदाहरणे ॥१३॥

द्व्यन्तस्थसंयोगपरे न यकारवकारौ करोषि तिरोवाराणि यत्पूतो अत्येषि सहस्रधारो अतित्वां काष्ठासु ॥१४॥

द्व्यन्तस्थसंयोगपरे अन्तस्थवर्णद्वयं परं यस्य सोऽयं द्व्यन्तस्थसंयोगपरः। तस्मिन् यकारवकारौ न भवतः। विकर्षस्तु पादपूरणार्थं स्वरेण क्रियत एवेत्यर्थः। यथा पुरधस्मानं वृषभꣳस्थिरप्स्नूं करोष्यर्यस्तरुषीर्दुवः स्युः (सा० ३२७)। औ तायीरोवाराणि अव्ययाजनो न पुरिचमुर्वोविशद्धारी३ (सा० ५१३) ओं वारं यत्पूतो अति एषि अव्या३म् (सा० ५३४)। ओं सोमोमरुत्वतेसुतः सहस्रधारो अतिअव्यमर्षा३तीं३३ (सा० ५२०)। त्वां काष्ठासु आ३३३३३हुं३ आ३३ वा३तो३ आ३४५ (सा० २३४) ॥१४॥

---

2. B^1 om. हुंआ ; VI om. वा इदो
3,5. B^1 पादादौ for पदादौ
5. AB^1IB^3 om. स्थितयोः
7. I ना३र्षं आसीद्दपां, B^3A नार्षदांसीददपां for नार्षद्यासीददपाम्
9,12. AIB^1B^3 संयोगे for संयोग°; V अन्तस्था° for अन्तस्थ°
12. AB^1B^3 संयोगस्यान्तस्थवर्ण° I संयोगान्तस्थवर्णं for अन्तस्थवर्ण
13. V विवर्णं for विकर्षः
14. V om. इत्यर्थः; B^3 om. यथा
15. AB^1 तिरो, I स्थिरो for तायीरो
16. B^1 अव्या३यां for अव्या३म्

अनेकश्चेत्संयोगः प्राकृतसंध्ययोः संदेहे संध्यो विकृष्यः ॥१५॥

अनेकश्चेत्संयोगः यदि न एकः द्वौ वा संयोगौ बहवो वा संयोगाः स्युः। द्विप्रकारश्च संयोगः। प्राकृतः संध्याश्रयश्च। यः प्रकृतो(-तौ?) भवति स प्राकृतः। यः संधौ भवति स संध्यः। तयोर्विकर्षं प्रति संदेहे इदं विधानमुपदिश्यते। प्राकृतसंध्योः संध्यस्य विकर्षः कार्यः पादपूरणार्थम् ॥१५॥

सदृशयोस्तु परो विकृष्यः ॥१६॥

एकस्मिन् पादे यदि द्वौ संयोगौ प्राकृतौ संध्यौ वा भवतः तौ च सदृशौ स्यातां। तत्र सदृशयोस्तु संयोगयोः संनिपाते परः संयोगो विकृष्यः पादपूरणार्थम्। अत्रोच्यते। सदृशयोस्तु परः इति वाच्यम्। लघुत्वात्। विकृष्यग्रहणानर्थक्यम्। कुतः। अधिकृतत्वात्। उच्यते। विकृष्यग्रहणं विकर्षपूर्वार्थम्। संयोगसमाम्नाये विकृष्टपूर्वः संयोगो भवत्येव। यथा परिस्वान-द्वितीयायां प्रस्तावे तुवं विप्रस्तुवं कवोऽम् (सा० १०६४) ॥१६॥

एतयोरेव श्लोकं त्वाचार्याः ॥१७॥

एतयोरेव प्राकृतसंध्ययोः संयोगयोरर्थाय श्लोकं त्वाचार्याः पठन्ति ॥१७॥

---

3. अनेक: for न एक:
4. V IB^{1}B^3 प्राकृतो for प्रकृतो
5. IAB^{1}B^3 om. य:; B^1 संध्यो for संधौ
10. AIB^1 om. तु ; V परस्पर० for पर:
12. AIB^3 विकृष्ट° for विकृष्य°
13. B^{3}IBB^1 विकृष्ट: पूर्वंपूर्वः for विकृष्टपूर्वः
16. V च for एव ; V om. संयोगयोः

ऊने पादे विकर्षः स्याद्यत्रयोर्यत्र वर्ततः ।
प्रस्तावेषु तथा वृत्सु गायत्रे विद्धि लक्षणम् ॥
इति ॥१८॥

ऊने पादे विकर्षो भवति । यवयोर्यत्र वर्ततः संयोगौ प्रस्तावेषु । यथा प्रस्तावेषु विकर्षः क्रियते तथा तेनैव प्रकारेण आवृत्सु अपि विकर्षः कार्यः । गायत्रे विद्धि लक्षणम् इति । गायत्रसाम्नि विजानीहि लक्षणमिति ॥१८॥

नैकस्वरसंघ एके ॥१९॥

इति शुङ्गकृते गायत्रविधाने द्वितीया कण्डिका ॥२॥

नेति प्रतिषेधः । यदि तद्विविढ्ढादौ एकस्मिन् स्वरे बहूनां संघातो भवति तत्र विकर्षो न भवति इत्येके आचार्या मन्यन्ते ॥१९॥

इति गायत्रविधानभाष्ये द्वितीया कण्डिका ॥२॥

---

1. B^2 AB^{1-3} I वर्तते for वर्ततः
4. AB^1IB^3 वर्तते for वर्ततः ; A om. यथा प्रस्तावेषु
5. B^1AV om. तथा
10. AI om. न

तृतीया कण्डिका

मात्रावृत्तम्

वसोर्मन्दान्त्याविकारेकारौ प्रत्यक्षौ ॥१॥

पद्यो गायत्र्यस्ये-(गा० वि० १.१)ति स्वरवृत्तमुक्तम् । तथा बर्हिष्पवमानाद्या रेतस्ये-(गा० वि० २.१)ति वर्णवृत्तमुक्तम् । अथ मात्रावृत्तमुपदिश्यते । वसोर्मन्दान्त्याविकारेकारौ प्रत्यक्षाविति । उद्गीथाद्ये वसोर्मन्दापर्वणि इकारश्च ईकारश्च प्रत्यक्षौ कार्यौ । न तु कश्चिद्विकारो भवतीत्यर्थः ॥१॥

उदाहरणानि—

अच्छादेव विवाससि । वाजेभिर्वाजिनीवत्यावाजं घृतेनेति ॥२॥

एतान्युदाहरणानि । ओमाच्छादेवविवासासीऽ२ (सा० ६६२) ओं वाजेभिर्वाजिनीवतीऽ२ (सा० १८९) । ओमावाजं वाज्यक्रमीऽ२ (सा० ६५५) । ओंघार्तेनवर्धयामासीऽ२ (सा० ६६१) ॥२॥

वृद्धमाभूतं तालव्यम् ॥३॥

तालव्यं गायत्रे साम्नि वृद्धम् आ भवति ॥३॥

---

3. AIB[1-8] विकारी° for विकारे°
5. B[1] प्रथमतः for अथ मात्रा°
6. IVB[1] after °दिश्यते ins. तमाह ; V om. वसोर्···उद्गीथा ; AB[1] IB[3] °विकारी° for °विकारे°
7. V मन्द्दाया: for मन्दा°
12. IAB[3] om. एतान्युदाहरणानि
14. B[1] वर्तं° for वर्ध°
16. IAB[1]B[3] एव for साम्नि

यथा—

ईङ्खयन्तीरसावि देवम् ॥४॥

ऋग्ग्रहणादुद्गीथोदाहरणं द्रष्टव्यम्। ओमा इन्द्रं जातमुपासातेऽइ (सा० १७५)। ओंनायस्मिन्निन्द्रोजनुषेमुवोच बोधामासित्वाहरियश्वयाज्ञेऽ२ (सा० ३१३) ॥४॥

औकारस्तोसो इति च पदान्तौ ॥५॥

ओकारश्च आ भवति। तो सो इत्येतौ च शब्दौ पदान्तेऽवस्थितौ आ भवतः। यावद्ग्रहणमेतत् ॥५॥

अस्माँ इन्द्रवसौ ब्रह्माणस्त्वा शतक्रतावाजाता सुक्रतो पृण राधस्तन्नो विद्द्वसोस्तीर्ण बर्हिर्विभावसो ॥६॥

ओकारस्य तो सो इत्येतयोश्च एतान्युदाहरणानि। अस्माँइन्द्रवसाऽ२११२हुम् आऽ२ (सा० ४१५)। ओकारस्यैकमेवोदाहरणम्। ओमार्च्चन्त्यर्कमर्किणो ब्रह्माणस्त्वा शतक्रताऽ२ (सा० ३४२)। आजातासुक्रताऽ१२१२हुम् आऽ२ (सा० ५२)। तो इत्येतस्यैते उदाहरणे द्वे। ओमास्तित्वादातमद्रिवोराधस्तन्नोविदद्वासाऽ२ (सा० ३४५)। स्तीर्ण बर्हिर्विभावा३३सा३३ (सा० २१३)। सो इत्येतस्य चैते द्वे उदाहरणे ॥६॥

---

3. IAB^3 om. ऋग्ग्रहणादुद्गीथ°
4. AIB^3 हर्यश्व for हरियश्व
5. AIB^3 B^2 ओकार: for औकार:
6. AIB^3 ओकार: for औकार:
12. B^3 A वसो···for वासा···
14. IA om. द्वे
15. I om. ओमास्ति···मद्रिवो

ऋकारश्च स्पर्शषोर्हुमायां च ॥७॥

ऋकारश्च आभवति स्पर्शे च षकारे च हुमायां प्रत्ययभूतायाम्। ककारादयो मकारान्ताः स्पर्शाः ॥७॥

उदाहरणानि वक्ष्यामः—

गृणानो वृषणमृक्वभिः ॥८॥

ऋकारस्य स्पर्शे षकारे च हुमोयां चेत्येतेषु प्रत्ययेषु एकैकमुदाहरणं द्रष्टव्यम्। ओं गार्णानोहव्यदातयाऽ२ (सा० १)। ओं वार्षणंपृक्षुसासाहोऽ२ (सा० ३८३)। सप्तास्येभिराऽ१२१२हुम् आऽ२ (सा० ४६३) ॥८॥

आभूतं गतिरेफान्तं विनियमश्च यथाप्रत्यासत्ति पूर्वाङ्गं च ॥९॥

यत्तत् पूर्वं तालव्यमाभूतं विहितम् ऋकारान्तं च तद्रूत्यन्तं च रेफान्तं च कार्यम्। विनियमश्च। विनियोगश्च तस्या गतेः रेफस्य च द्रष्टव्यः। यथाप्रत्यासत्ति। यस्य वर्णस्य यदासन्नलक्षणं दृश्यते तस्य तद्भवति। तालव्यस्य आईउस्थस्य आऊ इति गतिः प्रत्यासन्ना। ऋकारस्य रेफः प्रत्यासन्नः पूर्वाङ्गं च भवति। न पराङ्गम् ॥९॥

---

1. IB$^{2-3}$ षस्पर्शयो : for स्पर्शषोः; B^{3}A हिम्मायां for हुम्मायां ; AIB^{1}B^{3} combine sutras 7 and 8 into one.
2. B^{3}B^{1}AI om. स्पर्शे च···वक्ष्यामः (L. 4)
5. A उत्सभिः, B^{1} पृक्षुभिः for ऋक्वभिः
7. AB^{1}B^{3}I om. द्रष्टव्यम्
9. AB^{3} गीति° for गति° ; B^{3}AIB^{3}यथार्थं for यथा
11. V om. तत् ; VIB^{1} ऋकारं for ऋकारान्तं
12. V after विनियमश्च adds: यथाप्रत्यासत्ति and AIB^{3} यथार्थप्रत्यासत्ति
14. A आयिस्थस्य आगतिः B^{3}I आयिउस्थस्य आउगति B^{1} आयिउस्थस्य आउ। इत्युगतिः for आईउस्थस्य आऊइति गतिः ; V रिकारस्य for ऋकारस्य
15. AIB^{1} प्रत्यासत्तिभूतः for प्रत्यासन्नः

हुम्मायां तालव्यमपदान्त्यं यदाभूतं न तस्य गत्यागमः ॥१०॥

हुम्मायां प्रत्यये तालव्यमपदान्त्यं पदमध्यस्थमित्यर्थः । यदाभूतं न तस्य गतेरागमो भवति । आकारान्तमेव तद्भवतीत्यर्थः । उदाहरणानि वक्ष्यति ॥१०॥ 5

यकारे च समानाक्षरं यद् विकृष्टम् ॥११॥

यकारे च प्रत्यये समानाक्षरं समानाख्यं यत् विकृष्टं तालव्यमित्यर्थः ; न तस्य च गत्यागमो भवति ॥११॥

प्रेष्ठं वो अतिथिं बृहच्छोचायाविष्ठ्यबृहद्ग्ने-सुवीर्यम् । देवं देवाय दे ॥१२॥ 10

ऋग्ग्रहणादुद्गीथोदाहरणम् । ओं स्तुषेमित्रमिवप्रायाऽ२म् (सा० ५) । बृहच्छोचायवाऽ१२१२हुम् आऽ२ष्ठायो (सा० ६६१) । बृहदग्नेसुवाऽ१२१२हुम् आऽ२ (सा० ६६२) । रायोदेवंदेवायदाऽ१२१२हुम् आऽ२ (सा० ६५२) ॥१२॥ 13

---

1. AB^3 हिम्मायां for हुम्मायां ; I उपदान्तं A अमदान्ते for अपदान्त्यं ; B after न ins. पदे
4. AI om. तद् ; V om. इत्यर्थः
6. VB$^{1-3}$ om. विकृष्टम्
7. V om. समानाक्षरं ; AIB^1 om. समानाख्यं
8. V trans. न after °गमो
11. AB^3 उग्रहणं, I उग्रहणा for ऋग्ग्रहणात् ; AIB^3 उद्गाता for उद्गीथ
12. VB^1 om. ष्ठायो ; A हिम् for हुम्
13. AB^3 after आऽ२ adds : वायो

हुम्मायामेव मकारः प्रकृत्या ॥१३॥

हुम्मायामेव प्रत्यये मकारः पदान्तः प्रकृत्या भवति। यथा येषु सामसु लक्षणप्राप्तः स न भवतीत्यर्थः। उदाहरणानि वक्ष्यति ॥१३॥

आगमरेफश्चातिहृतः ॥१४॥

आगमरेफश्च अतिहृतो भवति। हुम्मायामेव प्रत्यये। उदाहरणानि वक्ष्यति ॥१४॥

अवग्रहपूर्वपदान्त्यं च व्यञ्जनम् ॥१५॥

यस्य व्यञ्जनस्य अवग्रहः पूर्वं पदं तदवग्रहपूर्वपदान्तीयं व्यञ्जनम्। व्यञ्जनावि(-ति?)हि(हृ?)ति[:] बहुव्रीहिणा समासेन। तथा व्यञ्जनमतिहृतं कर्तव्यम्। उदाहरणानि वक्ष्यति ॥१५॥

---

1. A हिम्मायाम् for हुम्मायाम्
2. V समासु for सामसु ; IB[1] समासलक्षण° for सामसु लक्षण°
4. V. om. आगमरेफश्चातिहृतः
6. AI om. वक्ष्यति
7. A पदान्तं for पदान्त्यं
8. IB[3] A व्यञ्जनान्तं व्यञ्जनवति, B[1] व्यञ्जनां यं व्यञ्जनवति for व्यञ्जनम्। व्यञ्जनातिहृतिः, V व्यञ्जनाविहिति for व्यञ्जनातिहृतिः The readings are corrupt here. Could it be : व्यञ्जनान्तम् ॥ व्यञ्जनवदिति बहुव्रीहिणा समासेन ॥ The commentator says that व्यञ्जनान्तं shoutd be taken as a बहुव्रीहि compound and (a pada) having a consonant (at the end). Thus after व्यञ्जनम् ॥ the passage should read व्यञ्जनान्तम् ॥ व्यञ्जनवदिति बहुव्रीहिणा ···. AIB[1]B[3] have omitted व्यञ्जनम् altogether from the commentary.

अष्कारश्च पद्गीतः ॥१६॥

हुम्मायामेव प्रत्यये अष्कारश्च पदगीतः कर्तव्यः । उदाहरणानि वक्ष्यति ॥१६॥

विहुतमूर्मिरपामिन्द्रो मुनीनाꣳ शंमध्यमं तासो मस्येहतृ ॥१७॥

एतानि मकारोदाहरणानि। निष्कर्ता विहुतांऽ१२१२ हुम्३आऽ२पू३नो३ (सा० २४४)। क्रीडन्नुर्म्मिरपांऽ१२१२हुम् ३आऽ२ ईवो (सा० ५८४)। इन्द्रोमुनीनां ऽ१२१२हुम्३आऽ२साखो (सा० २७५)। विकोशं मध्यमांऽ१२१२हुम्३आऽ२युग्वो३३ (सा० ५७९)। तासोमस्येहताऽ१२१२हुम्३आऽ२पातो (सा० ६७१) ॥१७॥

दिविद्यामिव दृक्वाभिः ॥१८॥

यदुक्तम् आगमरेफश्चातिहृत (गा० विधु० ३.१३) इति तस्यैते उदाहरणे। दिविद्यामिवदाऽ१२१२हुम् आऽ२ । रंहातो आऽ३४५ (सा० ?)। सप्तास्येभिराऽ२१२१हुम् ३आऽ२र्क्वाऽ३भोऽ (सा० ४६३) ॥१८॥

गच्छन्निन्द्रस्य निः पिबात्वस्य गिः पवमानस्वः ॥१९॥

यदुक्तम् अवग्रहपदान्त्यं च व्यञ्जनम् (गा० वि० ३.१४) इति तस्यैतान्युदाहरणानि । गच्छान्निन्द्रस्यनाऽ१२११हुम्३आऽ२ष्कार्तो

---

2. AIB³ om. हुम्मायामेव ⋯ वक्ष्यति (L. 3) ; B. प्र[त्य]येऽत्र for प्रत्यये
4. V विहृतिमूर्त्तिर् , for विमूतमुर्मिर्
14. V om. गच्छन्
15. IAB³ V °पदान्तीयं for °पदान्त्यं

(सा० १२६६) । पिबातुवस्यगाऽ१२१२हुम्३आऽ२र्वाणो (सा० १३९३) । पवमानसुवाऽ१२१२हुंआऽर्दशो (सा० ४८०) ॥१९॥

देवोह्यसि नो रिहते ककुभोमहि द्युत्तमः ॥२०॥

यदुक्तम् अष्कारश्च पदगीत (गा० वि० ३. १५) इति तस्यैतान्युदाहरणानि । देवोह्यसिनाऽ१२१३हुम्३आऽ२ (सा० १०) । रिहते ककुभाऽ१२१२हुम् आऽ२ (सा० ४०४) । महिद्युक्षतमाऽ१२१२हुम् आऽ२मादो आऽ (सा० ५७८) ॥२०॥

पाशब्दः पशब्दमावृत उपान्त्ये शुचिबन्धुः पावक इति ॥२१॥

पाशब्दः पशब्दमापद्यते । कुत्र । आवृत उपान्त्ये अक्षरे प्रत्यये । यथा-महिव्रतः शुचिबन्धुः पवा३का३ (सा० ५२४) इति ।

अत्रोच्यते । पा इति वाच्यम् । लघुत्वात् । शब्दग्रहणानर्थक्यम् । कुतः । अधिकृतत्वात् । उच्यते । शब्दग्रहणं विकल्पप्रतिषेधार्थम् । अष्टाक्षरो वा त्रिष्टुब्जगतीषु (गा० वि० १.२) इति विभाषया यदा अष्टाक्षरः प्रस्तावो भवति ऋगन्ते वा अष्टाक्षरमवशेषयति तदा इदमक्षरं पा इति अन्ते भवति । अत उपान्त्यं नोपपद्यते । इति । उपान्त्यम्(-न्त्ये?)एवायं

---

1. B^3IA सुतस्य for तुवस्य
3. V रहते, B^3 हंते for रिहते
5. IAB^3 after आऽ२ ins. दृशो
10. AIB^3 कुतः for कुत्र ; B^1 उपान्ते for उपान्त्ये
11. A पवाऽ१२१२ for पवा३का३
12. V om. अत्रोच्यते ; AI पाद for पा
14. IAB^1B^3 विभाषायां यद् for विभाषया यदा
15. V ऋगन्तश्च for ऋगन्ते वा ; IAB^3 तद् for तदा ; IAB^3 पाद for पा ; AIB^3 अन्तर् for अन्ते
16. IA अन्त for अत ; IAB^1 B^3 om. अयं

पादावृतो भवति । तदा पाशब्दः पशब्दमापद्यते । तदर्थमस्य ग्रहणम् ॥२१॥

शौङ्गं गायत्रविधानम् । शौङ्गं गायत्रविधानम् ॥२२॥

इति शुङ्गाचार्यकृतं गायत्रविधानं नाम सूत्रं समाप्तम् ।

शुङ्गेन कृतं शौङ्गम् । शुङ्गो नामाचार्यः ॥२२॥ 5

इति गायत्रविधानभाष्ये तृतीया कण्डिका समाप्ता ॥३॥

गायत्रविधानभाष्यं समाप्तम् ॥ 7

ॐ

---

1. B^3B^1IA पद्यः for पाद् ; V °वृत्तो for °वृतो
4. IB^1 B^3 V om. इति···सूत्रं समाप्तम्
5. IAB^1 B^3 after आचार्यः adds : तेन कृतम्
6. B^3 after समाप्ता ॥ adds : हरिः ॐ इति शुङ्गाचार्यकृतं गायत्रविधानं नाम सूत्रं सभाष्यं संपूर्णम् ॥ हरिः ॐ
7. IA संपूर्ण for समाप्तम् ; B^3 adds : इति before गायत्र° V. after the colophon adds : ॥ शुभं भवतु ॥ संवत् १६ आषाढादि ८५ वर्षे पोष शुदि ५ शुक्रे ॥ लिषितम् ॥ After this in a separate hand : त्र-शुरजी वीरेश्वररामचन्द्रनी पोथी ; A कुंभेश्वराय नमः । हरि ॐ । भग्नपृष्ठकटिग्रीवाबद्धमुष्टिरधोमुखम् । कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ॥ ,नागनाथाय नमः ॥; B^1. समाप्तोऽयं ग्रन्थः ॥

Index of Sūtras

Sūtra	*Ref.*	*Page*
अक्षरयोस्त्वे	१. ३४	14
अच्छादेव	३. २	22
अनभ्यासं त्वाचार्याः	२. ६	16
अनुज्ञानं वा	१. ३१	13
अनेकश्चेत् संयोगः	२. १५	20
अनन्तस्त्वोकारं-	१. ३	3
अवग्रहपूर्वपदान्त्यं-	३. १५	20
अवृद्धो वानवर्दं चेत्	१. १८	9
अव्यवानंस्त्वेव	१. १३	7
अष्कारश्च	३. १६	27
अष्टाक्षरो वा	१. २	3
अस्माꣳ इन्द्रवसो	३. ६	23
आकारश्च	१. २८	12
आगमरेफश्च	३. १४	26
आमूतं गति	३. ९	24
आरे बाधस्व	२. ११	18
ईङ्खयन्तीरसावि-	३. ४	23
उत्तमात्वविसृष्ट-	२. २	15
उद्गात्रोच्यमानो-	१. १६	11
उत्थानि प्रकृति-	२. १०	18
ऊने पादे-	२. ५	16
ऊर्ध्वं वार्च्चिकाद्	१. ३३	14
ऊर्ध्वं प्रस्तावात्	१. १४	8
ऋकारश्च स्पर्शयोर्	३. ७	23
ऋगन्तश्च	१. ४	4

Sutra	*Ref.*	*Page*
एतयोरेव	२. १७	20
ओकारस्तु	१. ६	5
ओकारस्तोसो	३. ५	23
कार्या वसोर्मन्दा-	१. १५	8
गच्छन्निन्द्रस्य	३. १६	27
गृणानो वृषणम्	३. ८	24
तस्य ऊर्ध्वं	२. ३	15
तस्यास्त्वन्तो-	१. १७	9
विविक्षामिव	३. १८	27
देवो ह्यसि नो-	३. २०	28
द्वादशवा-	२. ४	16
द्वितीया चावृद्-	१. १६	8
द्वयन्तस्थसंयोग-	२. १४	19
न पदादौ	२. १३	19
न वा	१. २३	10
निधनानि च	१. ३२	13
नैकस्वरसंघात°	२.१६	21
नैकेषाम्	१. ७	5
पद्यो गायत्रस्य	१. १	1
परमुद्गातोंकारेण	१. ८	5
पर्षि राधो-	२. ८	17
पाशब्दः पशब्द-	३. २१	28
प्रत्युत्क्रम्य कृष्टम्-	१. २०	10
प्रत्युत्क्रान्तस्-	१. १६	9
प्रयोजनानि च	२. ७	16
प्रस्तावेषु तथा	२. १८	21
प्राग्वा हिंकाद्वात्	१. ११	17
प्रेष्ठं वो अतिथिं	३. १२	25
बहिष्वमनाद्या-	२. १	15

Sutra	*Ref.*	*Page*
मध्ये वा	१. १०	7
यकारे च	३. ११	25
यत्र वा ताम्येत	१. १२	7
यथार्वा	१. ५	4
यवान्ते संयोगे	१. ६	18
वसोर्मन्दान्त्या-	३. १	22
वस्वीरनुस्वर-	२. ११	18
वाग्वा आकार-	१. ३०	13
विद्युतमूर्तिर्	३. १७	27
वृद्धमाभूतं	३. ३	22
वृद्धान्त्यावृत्	१. २७	11
व्यवान्याच्चेत्	१. ६	7
शौङ्गं गायत्रविधानम्	३. २२	29
सकृत्	१. २२	10
सदृशयोस्तु	२. १६	20
स द्विः	१. २१	10
स्तुत्वा वा सं-	१. ३५	14
स्वरितो वा	१. २६	12
हुम्मायां तालव्य-	३. १०	25
हुम्मायामेव-	३. १३	26
हुंम्मा सार्वस्वारा	१. १४	10
हुंम्मा हुवा	१. २५	11